श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ एकोनचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनचत्वारिंशः सर्गः ॥

इन्द्रेण सगरयज्ञसम्बन्धिनोऽश्वस्यापहरणम्, सगरात्मजैर्धराया भेदनं देवैर्ब्रह्माणं प्रति वृत्तस्यास्य विनिवेदनं च

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः।
उवाच परमप्रीतो मुनिं दीप्तमिवानलम्॥ **1.39.1** ॥

श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम्।
पूर्वजो मे कथं ब्रह्मन् यज्ञं वै समुपाहरत्॥ **1.39.2** ॥

तस्य तद् वचनं श्रुत्वा कौतूहलसमन्वितः।
विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव॥ **1.39.3** ॥

श्रूयतां विस्तरो राम सगरस्य महात्मनः।
शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः॥ **1.39.4** ॥

विन्ध्यपर्वतमासाद्य निरीक्षेते परस्परम्।
तयोर्मध्ये समभवद् यज्ञः स पुरुषोत्तम॥ **1.39.5** ॥

स हि देशो नरव्याघ्र प्रशस्तो यज्ञकर्मणि।
तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः॥ **1.39.6** ॥

अंशुमानकरोत् तात सगरस्य मते स्थितः।
तस्य पर्वणि तं यज्ञं यजमानस्य वासवः॥ **1.39.7** ॥

राक्षसीं तनुमास्थाय यज्ञियाश्वमपाहरत्।
ह्रियमाणे तु काकुत्स्थ तस्मिन्नश्वे महात्मनः ॥ **1.39.8** ॥

उपाध्यायगणाः सर्वे यजमानमथाब्रुवन्।
अयं पर्वणि वेगेन यज्ञियाश्वोऽपनीयते ॥ **1.39.9** ॥

हर्तारं जहि काकुत्स्थ हयश्चैवोपनीयताम्।
यज्ञच्छिद्रं भवत्येतत् सर्वेषामशिवाय नः ॥ **1.39.10** ॥

तत् तथा क्रियतां राजन् यज्ञोऽच्छिद्रः कृतो भवेत्।
सोपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ॥ **1.39.11** ॥

षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह।
गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ॥ **1.39.12** ॥

मन्त्रपूतैर्महाभागैरास्थितो हि महाक्रतुः।
तद् गच्छथ विचिन्वध्वं पुत्रका भद्रमस्तु वः ॥ **1.39.13** ॥

समुद्रमालिनीं सर्वां पृथिवीमनुगच्छथ।
एकैकं योजनं पुत्रा विस्तारमभिगच्छत ॥ **1.39.14** ॥

यावत् तुरगसन्दर्शस्तावत् खनत मेदिनीम्।
तमेव हयहर्तारं मार्गमाणा ममाज्ञया ॥ **1.39.15** ॥

दीक्षितः पौत्रसहितः सोपाध्यायगणस्त्वहम्।
इह स्थास्यामि भद्रं वो यावत् तुरगदर्शनम् ॥ **1.39.16** ॥

ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः।
जग्मुर्महीतलं राम पितुर्वचनयन्त्रिताः ॥ **1.39.17** ॥

गत्वा तु पृथिवीं सर्वामदृष्ट्वा तं महाबलाः।
योजनायामविस्तारमेकैको धरणीतलम्।
बिभिदुः पुरुषव्याघ्रा वज्रस्पर्शसमैर्भुजैः॥ **1.39.18** ॥

शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः।
भिद्यमाना वसुमती ननाद रघुनन्दन॥ **1.39.19** ॥

नागानां वध्यमानानामसुराणां च राघव।
राक्षसानां दुराधर्षं सत्त्वानां निनदोऽभवत्॥ **1.39.20** ॥

योजनानां सहस्राणि षष्टिं तु रघुनन्दन।
बिभिदुर्धरणीं राम रसातलमनुत्तमम्॥ **1.39.21** ॥

एवं पर्वतसम्बाधं जम्बूद्वीपं नृपात्मजाः।
खनन्तो नृपशार्दूल सर्वतः परिचक्रमुः॥ **1.39.22** ॥

ततो देवाः सगन्धर्वाः सासुराः सहपन्नगाः।
सम्भ्रान्तमनसः सर्वे पितामहमुपागमन्॥ **1.39.23** ॥

ते प्रसाद्य महात्मानं विषण्णवदनास्तदा।
ऊचुः परमसन्त्रस्ताः पितामहमिदं वचः॥ **1.39.24** ॥

भगवन् पृथिवी सर्वा खन्यते सगरात्मजैः।
बहवश्च महात्मानो वध्यन्ते जलचारिणः॥ **1.39.25** ॥

अयं यज्ञहरोऽस्माकमनेनाश्वोऽपनीयते।
इति ते सर्वभूतानि हिंसन्ति सगरात्मजाः॥ **1.39.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनचत्वारिंशः सर्गः॥